श्रीगणेशाष्टोत्तरशतनामस्तोत्रम्

{॥ श्रीगणेशाष्टोत्तरशतनामस्तोत्रम् ॥}

श्री गणेशाय नमः ।

यम उवाच ।

गणेश हेरंब गजाननेति महोदर स्वानुभवप्रकाशिन् ।

वरिष्ठ सिद्धिप्रिय बुद्धिनाथ वदंतमेवं त्यजत प्रभीताः ॥ १॥

अनेकविघ्नांतक वक्रतुंड स्वसंज्ञवासिंश्च चतुर्भुजेति ।

कवीश देवांतकनाशकारिन् वदंतमेवं त्यजत प्रतीभाः ॥ २॥

महेशसूनो गजदैत्यशत्रो वरेण्यसूनो विकट त्रिनेत्र ।

परेश पृथ्वीधर एकदंत वदंतमेवं त्यजत प्रतीभाः ॥ ३॥

प्रमोद मोदेति नरांतकारे षडूर्मिहंतर्गजकर्ण ढुण्ढे ।

द्वन्द्वारिसिन्धो स्थिर भावकारिन् वदंतमेवं त्यजत प्रतीभाः ॥ ४॥

विनायक ज्ञानविघातशत्रो पराशरस्यात्मज विष्णुपुत्र ।

अनादिपूज्याऽऽखुग सर्वपूज्य वदंतमेवं त्यजत प्रतीभाः ॥ ५॥

वैरिच्य लंबोदर धूम्रवर्ण मयूरपालेति मयूरवाहिन् ।

सुरासुरैः सेवितपादपद्म वदंतमेवं त्यजत प्रतीभाः ॥ ६॥

वरिन्महाखुध्वजशूर्पकर्ण शिवाज सिंहस्थ अनंतवाह ।

दितौज विघ्नेश्वर शेषनाभे वदंतमेवं त्यजत प्रतीभाः ॥ ७॥

अणोरणीयो महतो महीयो रवेर्ज योगेशज ज्येष्ठराज ।

निधीश मंत्रेश च शेषपुत्र वदंतमेवं त्यजत प्रतीभाः ॥ ८॥

वरप्रदातरदितेश्च सूनो परात्पर ज्ञानद तारवक्त्र ।

गुहाग्रज ब्रह्मप पार्श्वपुत्र वदंतमेवं त्यजत प्रतीभाः ॥ ९॥

सिधोश्च शत्रो परशुप्रयाणे शमीशपुष्पप्रिय विघ्नहारिन् ।

दूर्वाभरैरचित देवदेव वदंतमेवं त्यजत प्रतीभाः ॥ १०॥

धियः प्रदातश्च शमीप्रियेति सुसिद्धिदातश्च सुशांतिदातः ।

अमेयमायामितविक्रमेति वदंतमेवं त्यजत प्रतीभाः ॥ ११॥

द्विधा चतुर्थिप्रिय कश्यपाश्च धनप्रद ज्ञानप्रदप्रकाशिन् ।

चिंतामणे चित्तविहारकारिन् वदंतमेवं त्यजत प्रतीभाः ॥ १२॥

यमस्य शत्रो अभिमानशत्रो विधेर्जहंतः कपिलस्य सूनो ।

विदेह स्वानंदजयोगयोग वदंतमेवं त्यजत प्रतीभाः ॥ १३॥

गणस्य शत्रो कमलस्य शत्रो समस्तभावज्ञ च भालचंद्र ।

अनादिमध्यांतमय प्रचारिन् वदंतमेवं त्यजत प्रतीभाः ॥ १४॥

विभो जगद्रूप गणेश भूमन् पुष्ठेःपते आखुगतेति बोधः ।

कर्तुश्च पातुश्च तु संहरेति वदंतमेवं त्यजत प्रतीभाः ॥ १५॥

इदमष्ठोत्तरशतं नाम्नां तस्य पठंति ये ।

श्रृणवंति तेषु वै भीताः कुरूध्वं मा प्रवेशनम् ॥ १६॥

भुक्तिमुक्तिप्रदं ढुण्ढेर्धनधान्यप्रवर्धनम् ।

ब्रह्मभूतकरं स्तोत्रं जपन्तं नित्यमादरात् ॥ १७॥

यत्र कुत्र गणेशस्य चिह्नयुक्तानि वै भटाः ।

धामानि तत्र संभीताः कुरूध्वं मा प्रवेशनम् ॥ १८॥

इति श्रीमदांतये मुद्गलपुराणे यमदूतसंवादे

गणेशाष्टोत्तरशतनामस्तोत्रम् समाप्तम् ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

Ganesha Ashtottara Shatanama Stotram Lyrics in Devanagari PDF
% File name : gaNeshAShTottarashatanAmastotram.itx
% Category : aShTottarashatanAma
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)
% Description-comments : mudgalapurANa
% Latest update : January 26, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website